**Pratidhwani the Echo**
*A Peer-Reviewed International Journal of Humanities & Social Science*
***ISSN: 2278-5264 (Online) 2321-9319 (Print)***
***Impact Factor: 6.28*** *(Index Copernicus International)*
*Volume-XI, Special Issue, June 2023, Page No.334-338*
*Published by Dept. of Bengali, Karimganj College, Karimganj, Assam, India*
*Website: http://www.thecho.in*

# किरणावल्यां जगन्निदाननिरूपणम्

**ड. प्रलयो ब्यानार्जी**
*सहायक अध्यापक, संस्कृत विभाग, पाँचमुड़ा महाविद्यालय, बाँकुड़ा, पश्चिम बंगाल, भारत*
Email: pralaybnrj40@gmail.com

**Abstract:**
*A few studies are presented here about atomic theory according to Kiranabali. Kiranabali said that if the earth with the characteristics of fragrance were impermanent, then since it is an infinite component, there is an assumption of the error of non-state. Then it is proper to accept that the earth is also eternal. The theory is that the combination of two atoms produces a diatom, and therefore the atom is the resting place of the difference in size. The work begun by two atoms is not great, since there is no reason for the greatness of the diatom. Therefore, the theory is that the greater matter is initiated by that diatom by the combination of the number of plurality. Again, the authors have theorized that the diatom is not a matter without components or a matter with components, since it is a functional matter, since the state of non-atom is prevented to dispel the doubt. This is the perfection of the diatomic and other processes.*

**Keywords: Atomic non-componentism, The atom is the resting place of the dimensional continuity, The accomplishment of the diatomic and other processes.**

प्रबन्धसारः को अध्वा वेद क इह प्रवोचत् ... इयं विसृष्टिः।। इत्याकारिका नैकविधा जिज्ञासा आसृष्टेः प्रचलिता। कार्यजगतोऽस्य कारणसन्ततिसु केषाञ्चन कारणानां दर्शनेऽपि पञ्चभूतात्मकस्यास्य कार्यजगतः किं तावन्निदानमित्यनुसन्धित्सूनां दार्शनिकानां परमाणुचिन्ताचमत्कृतिरुद्देतीति ज्ञायते। किरणावल्यां सम्प्राप्तानां पारमाणविकं समयमाश्रित्य किञ्चनाध्ययनमेवात्र समुपस्थाप्यते। तत्र तेनोक्तं गन्धवत्त्वलक्षणयुक्ता पृथिवी यदि अनित्या एव स्यात् तर्हि अनन्तावयवत्वात् अनवस्थादोषापत्तिः। ततः पृथिव्या नित्यत्त्वस्यापि स्वीकरणमुचितम्। परमाणुद्वयसंयोगेन द्व्यणुकमुत्पद्यते अतः परमाणुः एव परिमाणतारतम्यविश्रामस्थानमिति सिद्धान्तः। परमाणुभ्यामारब्धं कार्यं न महत्, द्व्यणुकस्य महत्त्वे कारणाभावात्। तस्मात्तेन द्व्यणुकेन महद्द्रव्यमारभ्यमाणं बहुत्वसंख्यायोगिनैवेति सिद्धान्तः। पुनः द्व्यणुकं न निरवयवद्रव्यारब्धं सावयवद्रव्यारब्धं वा कार्यद्रव्यत्वात् इत्यनुमानशङ्काया निरसनार्थमनवस्थाप्रतिहतत्वादिति सिद्धान्तितं ग्रन्थकारैः । इति द्व्यणुकादिप्रक्रमसिद्धिः।

कूटशब्दाः परमाणुनिरवयवत्ववादः। परमाणुः एव परिमाणतारतम्यविश्रामस्थानम्। द्व्यणुकादिप्रक्रमसिद्धिः।

उपोद्घातः को अध्वा वेद क इह प्रवोचत्। कुत आजाता कुत इयं विसृष्टिः।। इत्याकारिका नैकविधा जिज्ञासा आसृष्टेः प्रचलिता । नैके दार्शनिकाः यथार्थरूपेण वक्तुं समर्थाः, कदा कस्मात् कथं वा जगदुत्पत्तिरासीदिति।

केचन स्वभाववशात्, परिणामवशात् केचित्, विवर्तवशात् चान्ये जगदुत्पत्तिं व्याख्यातवन्तः। कार्यजगतोऽस्य कारणसन्ततिसु केषाञ्चन कारणानां दर्शनेऽपि पञ्चभूतात्मकस्यास्य कार्यजगतः किं तावन्निदानमित्यनुसन्धित्सूनां दार्शनिकानां परमाणुचिन्ताचमत्कृतिरुद्भेतीति ज्ञायते। किरणावल्यां सम्प्राप्तानां पारमाणविकं समयमाश्रित्य किञ्चनाध्ययनमेवात्र समुपस्थाप्यते। उदयनाचार्येण तदीयकिरणावल्यां नित्यानित्यभेदेन पृथिव्यां द्वैविध्यं विचार्यते। तत्र तेनोक्तं गन्धवत्त्वलक्षणयुक्ता पृथिवी यदि अनित्या एव स्यात् तर्हि अनन्तावयवत्वात् अनवस्थादोषापत्तिः। ततः पृथिव्या नित्यत्त्वस्यापि स्वीकरणमुचितम्। 1 तत्र परमाणुलक्षणा नित्या इति। लोष्ट्रस्य विभज्यमानावयवस्याल्पतरमल्पतमम् च परिमाणमुत्तरोत्तरं भवति। अयमल्पतरत्वप्रसङ्गो यतो निवर्तते यतो नाल्पीयोऽस्ति स एव परमाणुः। 2 (If this element of earth be of the non-eternal variety only, there arises the absurdity of infinite regress with regard to component part[अनवस्था]. Moreover, even when any one of the component part is destroyed, the effect would have to be considered as without a substratum. Otherwise if the element of earth is of the eternal variety only, it would be something unproved. Moreover, an effect even though possessing the quality of smell, would have to be considered a new kind of substance.)

न हि अवयवावयविपरम्परा सीमाहीनेति वाच्यम् अनन्तावयवारब्धत्ववैलक्षण्याभावे पर्वतसर्षपयोः परिमाणभेदस्योपपत्तेरसम्भवात्। न च अवयवसंख्याभेदाभावेऽपि अवयवानां परिमाणतः प्रचयतश्च अवयविपरिमाणपार्थक्यं युक्तमिति युक्तम्, संख्यावैषम्याभावे तद्द्वयोरपि उपपत्तेरभावात्। प्रलये एव अवयवपरम्परापर्यवसानमित्यपि वक्तुं न युक्तम् , अन्तिमस्य कस्यापि अवयवस्य निरवयवत्वे प्रलयस्यैव असिद्धत्वात् , यतः अवयवविभागं अवयवविनाशं वा विना कस्यापि द्रव्यस्य विनाशो नैव भवितुमर्हति । 3 केचन वदन्ति त्रसरेणोः प्रत्यक्षसिद्धत्वात् विषयेऽस्मिन् प्रमाणान्तरगवेषणया को लाभः ? त्रसरेणोः अवयवकल्पनायां प्रमाणाभावेन परमाणोः निरवयवत्वमसिद्धमिति तत्र त्रसरेणोः अन्त्यावयवद्रव्यत्वं सिद्धमिति पूर्वपक्षिणः।4 विषयेऽस्मिन् केचन सिद्धान्तिनः अणुपरिमाणतारतम्यं क्वचिद् विश्रान्तं परिमाणतारतम्यात् महत्परिमाणतारतम्यवत् इत्यनुमानं स्वीकुर्वन्ति। एतदनुमानेन यत्र परिमाणतारतम्यं विश्राम्यति तस्य निरवयवत्वं सिद्धम् । अतः महत्परिमाणविशिष्टत्वात् अणुपरिमाणतारतम्यावधिः न स्यात् त्रसरेणुः। परमाणुद्वयसंयोगेन द्व्यणुकमुत्पद्यते अतः परमाणुः एव परिमाणतारतम्यविश्रामस्थानमिति सिद्धान्तः।

प्रशस्तपादाचार्येण तु द्व्यणुकादिप्रक्रमेण जगदुत्पत्तिः स्वीकृता। परन्तु द्व्यणुक एव प्रमाणाभावात् कथं प्रकारेणानेन स्थूलजगदुत्पद्यते? प्रत्यक्षसिद्धाः तावत् त्रसरेणवः। प्रत्यक्षसिद्धत्वात् त्रसरेणोः महत्परिमाणविशिष्टत्वमपि प्रमाणसिद्धम्। द्रव्यस्य चाक्षुषतां प्रति रूपविशेषवन्महत्वस्यापि कारणत्वात्। अतः परमाणुतः त्रसरेणूत्पत्तिः, न पुनः द्व्यणुकोत्पत्तिः; प्रत्यक्षविषयत्वाभावात् महत्परिमाणरहितत्वात् च। तथा च परमाणव एव त्रसरेण्ववयवा इति कुतो द्व्यणुकमिति पूर्वपक्षिणः।5

महत्कार्यद्रव्यस्य कार्यद्रव्यारभ्यत्वनियमाद् द्व्यणुकसिद्धिरिति उदयनाचार्यसिद्धान्तः। महत्परिमाणविशिष्टकार्यद्रव्याणां समवायिकारणरूपेण कार्यद्रव्यस्यावस्थितिः दृश्यते। नियमेनानेन त्रसरेणुरूपमहत्परिमाणविशिष्टकार्यद्रव्यस्य समवायिकारणरूपद्व्यणुकम् अनुमानप्रमाणेन सिध्यति। परमाणुभिः मिथः संयोगेन महत्कार्यद्रव्यस्योत्पत्तौ स्वीकृतायाम् त्रसरेण्वादिक्रमेण सृष्टिप्रक्रियाया अपि

अनावश्यकता दृश्यते। पुनश्च घटपटादीनां महदवयवद्रव्याणाम् आन्तरालिकावयवधारातः उत्पत्तेः प्रत्यक्षसिद्धत्वात् सृष्टिप्रक्रियायाम् द्व्यणुकादिक्रमस्वीकरणमुचितमिति दिक् । 6

अवयवावयविशृङ्खला यथा परमाणौ विश्राम्यति तद्वत् अवयवसंख्यापकर्षः क्वचिद् विश्राम्यति। तत्र त्रित्वसंख्याया अपकर्षकाष्ठाभावात्, द्वित्वसंख्याया एकत्वहेतुत्वात् अपकर्षकाष्ठासम्भवात् द्व्यणुकादिप्रक्रमेण जगदुत्पत्तिसिद्धान्तः अभ्रान्तः। एकत्वसंख्याविशिष्टावयवस्य अवयव्यारम्भकत्वं नास्ति अवयवसंयोगानुपपन्नत्वात् असमवायिकारणाभावात् च। अवयवगतानेकत्वस्यापेक्षा विद्यते अवयवापेक्षया च अवयविनोऽधिकपरिमाणत्वनियमात्। तस्मात् द्वित्वस्य अपकर्षपर्यन्तत्वात् तदादिरयमारम्भः। परमाणुभ्यामारब्धं कार्यं न महत्, द्व्यणुकस्य महत्त्वे कारणाभावात्। तस्मात्तेन द्व्यणुकेन महद्द्रव्यमारभ्यमाणं बहुत्वसंख्यायोगिनैवेति सिद्धान्तः। 7

द्व्यणुकवत् परमाणवोऽपि बहुत्वसंख्यामाश्रित्य महत्कार्यमारभन्त इति न युक्तम् अनियमारम्भस्य निषिद्धत्वात्। कारणकारणस्य कार्यकार्यजातीयानारम्भकत्वात् पटोत्पत्तौ तन्तूनामेव कारणत्वं न च तत्कारणानामंशूनामपि । एतेनानुमीयते त्रसरेणवो न निरवयवद्रव्यारब्धाः, परन्तु द्व्यणुकारब्धा एव। पुनः द्व्यणुकं न निरवयवद्रव्यारब्धं सावयवद्रव्यारब्धं वा कार्यद्रव्यत्वात् इत्यनुमानशङ्काया निरसनार्थमनवस्थाप्रतिहतत्वादिति सिद्धान्तितं ग्रन्थकारैः। इति द्व्यणुकादिप्रक्रमसिद्धिः।8

तथ्यसूत्राणि –

1. सेयं पृथिवी यद्यनित्यैव, तदा अवयवानवस्था स्यात् । एकस्य हि कस्यचिदवयवस्य निवृत्तौ निराश्रयञ्च कार्यमापद्येत । अथ नित्यैव, निष्प्रमाणिका तर्हि स्यात् । कार्यञ्च गन्धवदपि द्रव्यान्तरं स्यात् । अत आह। सा च द्विविधा, नित्याचानित्या चेति । - किरणावल्याम् , महाभूतचतुष्टयप्रकरणे । ( गौरीनाथ शास्त्री-महोदयस्य ग्रन्थे तृतीये खण्डे 113 पृष्ठायाम् )

2. तथाहि स्थूलकार्यस्य लोष्टादेरवयवक्रियाविभागादिन्यायेन विभज्यमानस्याल्पतरतमादिभावात् यतो नाल्पीयस्तं परमाणुमाचक्ष्महे। - किरणावल्याम्, महाभूतचतुष्टयप्रकरणे। (गौरीनाथ शास्त्री-महोदयस्य ग्रन्थे तृतीये खण्डे 116 पृष्ठायाम्)

3. एष हि अवयवावयविप्रसङ्गो न तावन्निरवधिरेव। अनन्तावयवारब्धत्वाविशेषेण मेरूसर्षपयोः परिमाणभेदानुपपत्तेः। न च कारणसंख्या अतिविशेषेऽपि परिमाणप्रचयाभ्यां विशेष इति युक्तम्। तयोरपि संख्याविशेषाभावेऽनुपपत्तेः। नापि प्रलयावधिः कस्यचिदन्त्यस्य निरवयवत्वे तदनुपपत्तेः। द्रव्यस्यावयवविभागविनाशाभ्यां विना विनाशाभावात्। - किरणावल्याम्, महाभूतचतुष्टयप्रकरणे। (गौरीनाथ शास्त्री-महोदयस्य ग्रन्थे तृतीये खण्डे 118 पृष्ठायाम्)

4. निरवयवावधिरयमवयवावयविप्रसङ्ग इति विज्ञायते। तकिर्तमेव, न तु प्रमितमिति चेत्; अत्र कश्चिदाह। किमत्र प्रमाणान्तरगवेषणया, त्रसरेणोः प्रत्यक्षसिद्धत्वात्। तस्य च अवयवकल्पनायां प्रमाणाभावेन निरवयवत्वात्। - किरणावल्याम्, महाभूतचतुष्टयप्रकरणे। (गौरीनाथ शास्त्री-महोदयस्य ग्रन्थे तृतीये खण्डे 122 पृष्ठायाम्)

5. ननु कोऽयं द्व्यणुकादिप्रक्रमो, द्व्यणुक एव प्रमाणाभावात्। त्रसरेणवस्तावत् प्रत्यक्षसिद्धाः। ते च चाक्षुषद्रव्यत्वादेव महान्तः। द्रव्यस्य चाक्षुषतां प्रति रूपविशेषवन् महत्वस्यापि कारणत्वात्। अन्यथा

दूरदूरतरादौ तत्प्रकर्षानुविध्यनुपपत्तेः। महत्त्वे सति रूपवत्त्वात् क्रियावत्त्वाच्च ते सावयवाः कार्याश्च। अन्यथा अवयवगतसंख्याद्यनुपपत्तौ महत्वानुपपत्तेः। नित्यत्वे प्रकर्षकाष्ठाप्राप्ताल्पीभावस्य महत्वविरोधात्। न च त्रसरेण्वावयवा अपि सावयवास्तदवयवकल्पनायां प्रमाणाभावात्। न हि त्रसरेणुवत् तेऽपि महान्तः, रूपविशेषवतां महतां चाक्षुषत्वप्रसङ्गात् यद्यपि च ते महत्वव्यावृत्तेरणुपरिमाणा निरवयवत्वाच्च प्रचयवञ्चितास्तथापि वहुत्वान् महत्कार्यद्रव्याण्यारप्स्यन्ते। तथा च परमाणव एव त्रसरेण्ववयवा इति कुतो द्व्यणुकम्। - किरणावल्याम्, महाभूतचतुष्टयप्रकरणे। (गौरीनाथ शास्त्री-महोदयस्य ग्रन्थे तृतीये खण्डे 177 पृष्ठायाम्)

6. उच्यते। महतः कार्यद्रव्यस्य कार्यद्रव्यारभ्यत्वनियमाद् द्व्यणुकसिद्धिः। अन्यथा परमाणुभिरेव वहुत्वसंख्योपेतैर्महद्द्रव्यारम्भे गोघटादेरपि तैरेवारम्भसम्भवाद् आन्तरालिकाल्पाल्पतरादिकार्योपलम्भविरोधात्। - किरणावल्याम्, महाभूतचतुष्टयप्रकरणे। (गौरीनाथ शास्त्री-महोदयस्य ग्रन्थे तृतीये खण्डे 181 पृष्ठायाम्)

7. उच्यते। यथा हि अवयवावयविप्रसङ्गः परमाणुषु विश्राम्यति तथ्यायमवयवसंख्यापकर्षः क्वचिद् विश्राम्येत्। न च त्रित्वमपकर्षकाष्ठा द्वित्वैकत्वयोः सम्भवात्। तत्रैकमनारम्भकम् , अवयवसंयोगानुपपत्तौ असमवायिकारणाभावात्। अनेकसंख्याभावे च अवयविनोऽवयवापेक्षयाधिकपरिमाणानुपपत्तेः। अवयवापेक्षया च अवयविनोऽधिकपरिमाणत्वनियमात्। एकस्य च अवयवस्य विभागानुपपत्तौ तत्कार्यस्य विनाशारम्भके नित्यत्वप्रसङ्गात्। तथा च द्वित्वमपकर्षपर्यन्तः। तदादिरयमारम्भः। तच्च द्वाभ्यां परमाणुभ्यामारब्धं कार्यं न महत्। तथात्वे तस्य कारणाभावात्। तदपि द्व्यणुकं यदि नारभेत, यदि च द्वित्वसंख्यायुक्तमारभेत, उभयथापि तदुत्पादनवैयर्थ्यं स्यात्। तस्मात्तेन महद्द्रव्यमारभ्यमाणं बहुत्वसंख्यायोगिनैवैवेति नियमः। - किरणावल्याम् , महाभूतचतुष्टयप्रकरणे। (गौरीनाथ शास्त्री-महोदयस्य ग्रन्थे तृतीये खण्डे 188 पृष्ठायाम्)

8. न च द्व्यणुकवत् परमाणवोऽपि बहुत्वमाश्रित्य महत्कार्यमारभन्त इति युक्तम्। अनियमारम्भस्य निषिद्धत्वात्। कारणकारणस्य कार्यकार्यजातीयानारम्भकत्वात्। न हि तन्तवः पटमारभन्ते तत्कारणञ्चांशव इति। तस्माद् विवादध्यासितास्त्रसरेणवो न निरवयवद्रव्यारब्धाः सावयवारब्धा इति वा। महत्त्वे सति कार्यत्वात्। उभयवादिसिद्धद्व्यणुकारब्धत्रसरेणुवद् घटवद् वेति। न स्याच्च द्व्यणुकमपि न निरवयवद्रव्यारब्धं, सावयवद्रव्यारब्धं वा कार्य्यद्रव्यत्वादिति। अनवस्थाप्रतिहतत्वादिति द्व्यणुकादिप्रक्रमसिद्धिः।- किरणावल्याम् , महाभूतचतुष्टयप्रकरणे। (गौरीनाथ शास्त्री-महोदयस्य ग्रन्थे तृतीये खण्डे 191 पृष्ठायाम् )

अनुशीलितग्रन्थपञ्जीः

1) अन्नंभट्ट. तर्कसंग्रह. नारायणचन्द्र गोस्वामी. कोलकाताः संस्कृत पुस्तक भाण्डार, 1410(बंगाब्द).
2) उदयनाचार्यः. किरणावली. गौरीनाथ शास्त्री. कोलकाताः पश्चिमबंग राज्य पुस्तक पर्षद, 1990.
3) प्रशस्तपाद. प्रशस्तपाद-भाष्य. श्रीनिवास शास्त्री. गाजियावादः इण्डो-विजन प्राइवेट लिमिटेड, 1984.
4) प्रशस्तपाद. प्रशस्तपाद-भाष्यम्. श्रीदुर्गाधरझा-शर्मा. वाराणसीः not found, 1993.

5) भट्टाचार्य, विश्वनाथ. भाषापरिच्छेद कारिकावली. लोकमणि दाहाल. वाराणसीः चौखम्बा सुरभारती, 2004.
6) महर्षि, कणाद. वैशेषिकदर्शनम् प्रशस्तपाद-भाष्यसहितम्. ढुण्ढिराज शास्त्री. वाराणसीः चौखम्बा संस्कृत संस्थानम्, 2002.
7) महर्षि, गौतम. न्याय दर्शन. फणिभूषण तर्कवागीश. कोलकाताः पश्चिमबंग राज्य पुस्तक पर्षद, 2000.
8) Mishra, Sankar. Vaiśeṣika-sūtropaskāra. S.N.Mishra. Varanasi: Chaukhamba Sanskrit Sansthan, 1995.
9) śiromaṇi, Raghunātha. The Padārthatattva-nirūpaṇam. Madhusudan Bhattacharya Nyayacharya. Calcutta: Sanskrit College, 1976.